**Model Question Paper**

**First Term Evaluation 2025 -26**

**First Language - Paper I - Part I**

**SANSKRIT**

**(For Academic and Oriental Sanskrit Schools)**

**Class- VIII**

**Time 1 ½ Hours** **Total Score - 40**

निर्देशा: -

- 15 निमेषा: समाश्वासकाल: ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्का: काल: च परिगणनीया:।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**भागः - 1**

1. अधोदत्तेभ्यः भिन्नं गणं चित्वा लिखत । (1)

क) अवनिः - भूमिः ख) रजनी - रात्रिः

ग) कृषकः - पयोदः घ) दीपपतिः - सूर्यः

**प्रस्तावनां पठित्वा 2-3 प्रश्नयोः उत्तरे लिखत।**

2. (१) जलाशयेषु मालिन्यनिक्षेपः निरुद्धं कार्यमस्ति। (1)

(२) पलास्तिकवस्तूनां ज्वालनं परिस्थितिदूषणाय भवति।

क) उभयमपि (१, २) साधु । ख) उभयमपि (१, २) असाधु ।

ग) १-साधु, २-असाधु । घ) १-असाधु, २-साधु ।

3. (१) शिष्यः विद्यालयं गच्छति। (1)

(२) कर्षकेण कविता पठ्यते।

क) १- कर्तरि प्रयोगः, २ - कर्मणि प्रयोगः। ख) २- कर्तरि प्रयोगः, १ - कर्मणि प्रयोगः।

ग) उभयमपि (१, २) कर्तरि प्रयोगः। घ) उभयमपि (१, २) कर्मणि प्रयोगः।

4. अधोदत्तपट्टिकां पठित्वा विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (1)

| | |
|---|---|
| गत्वा | - तुमुन्नन्तम् |
| प्रणम्य | - क्त्वान्तम् |
| पठितुम् | - ल्यबन्तम् |

© State Assessment Cell – SCERT Kerala

क) गत्वा – ल्यबन्तम्, प्रणम्य – तुमुन्नन्तम्, पठितुम् – क्त्वान्तम्

ख) गत्वा – क्त्वान्तम्, प्रणम्य – ल्यबन्तम्, पठितुम् – तुमुन्नन्तम्

ग) गत्वा – तुमुन्नन्तम्, प्रणम्य – क्त्वान्तम्, पठितुम् – ल्यबन्तम्

घ) गत्वा – क्त्वान्तम्, प्रणम्य – तुमुन्नन्तम्, पठितुम् – ल्यबन्तम्

## भागः - 2

**कविताभागं पठित्वा 5-6 प्रश्नयोः उत्तरे लिखत।**

पूर्वस्यां दिशि पर्वतराजः
कनकं तापयति।
कोकिलपोतो मङ्गलगानं
मधुरं श्रावयति।।

ग्रामसुतायै दर्पणवेषं
तनुते शैवलिनी ।
अञ्जनलेपं राति निकामं
रजनी ग्रामसखी ।।

5. वानरस्य पोतः → वानरपोतः। तादृशं समस्तपदं कविताभागात् स्वीकृत्य विग्रहवाक्यं लिखत। (2)

.................. → ..................................................।

6. ग्रामे निर्मला नदी प्रवहति – इत्याशययुक्तां कवितापङ्क्तिं लिखत। (2)

7. अधोदत्तं गद्यभागं पठित्वा काकस्य वचनानि समाहृत्य संभाषणांशं पूरयत । (2)

एकदा कश्चन काकः वेगेन आगत्य एवमवदत् - 'अयि मित्राणि! कश्चन मानवः अस्माकं वनं नाशयति' । वानरः- 'अहो ! कथम्'? काकः - 'मानवः वृक्षस्य छेदनं कुर्वन्नासीत् । तत्पतित्वा मयूरस्य नीडं भग्नम् अभवत् । मयूरः दीनं रोदिति' ।

काकः - अयि मित्राणि ! ....................................।
वानरः - 'अहो ! कथम्'?
काकः - ..............................................।

8. 'यदा – तदा' उपयुज्य वाक्यद्वयं योजयत । (2)

पुत्रस्य सन्देशः आगतः। पिता सन्तुष्टः अभवत् ।

.........................................................।

9. उदाहरणानुसारं वाक्यपरिवर्तनं कुरुत। (2)

उदा – अध्यापिका – 'पाठं सम्यक् पठतु'।
पाठं सम्यक् पठतु इति अध्यापिका अवदत्।

© State Assessment Cell – SCERT Kerala

क) पिता – 'शिरस्त्रं धृत्वा एव मोटोर् द्विचक्रिकां चालयतु'।

.........................................................................।

10. उदाहरणानुसारं मञ्जूषातः पदानि क्रमीकृत्य उचितं वाक्यं रचयत। (2)

| | | | | |
|---|---|---|---|---|
| गौतमः | गोकुलः | सह | ग्रन्थालयं | गच्छति |
| नीलिमा | जनकः | | आपणं | |
| ज्योष्ठः | अनुजः | | उद्यानं | |

उदा – गौतमः **गोकुलेन सह** ग्रन्थालयं गच्छति।

.........................................................................।

.........................................................................।

**अथवा**

उदाहरणानुसारं वाक्यं परिवर्तयत।

उदा – महेशः चलच्चित्रं पश्यति।

महेशः चलच्चित्रं **अपश्यत्**।

क) लिहारा कवितां लिखति।

.........................................।

**खण्डिकां पठित्वा 11-12 प्रश्नयोः उत्तरे लिखत।**

वयनाडु मुण्डक्कै चूरल्मला प्रदेशेषु प्रवृत्ते भूस्खलने 225 जनाः मृताः 155 जनाः अप्रत्यक्षाश्च अभवन्। 28 जनानामवस्था इतोऽपि ज्ञातव्या।

11. समानसन्धियुक्तं पदं खण्डिकातः स्वीकृत्य पदच्छेदं कुरुत। (2)

उदा – आधाराश्च = आधाराः + च

.........=............+.......।

गतोऽपि= गतः + अपि

.........=............+..........।

12. संख्यां संस्कृतभाषया लिखत। (3)

225 - ..................................................।

155 - ..................................................।

28 - ...................................................।

13. पट्टिकाम् उचितरीत्या पूरयत। (3)

| | | |
|---|---|---|
| अहं लिखामि | आवां ................ | वयं लिखामः |

© State Assessment Cell – SCERT Kerala

| | | |
|---|---|---|
| अहं ................. | आवां गच्छामः | वयं ................ |

14**. प्रादेशिकभाषया विवर्तयत।** (4)

आगस्त् मासे अतिवृष्ट्या सर्वत्र जलोपप्लवः अभवत्। तस्मिन् जलोपप्लवे कश्चन शुनकः गृहस्योपरि परित्यक्तः अभवत्। सः शुनकः साहाय्यार्थं उच्चैः भषति स्म, किन्तु तस्य शब्दं मेघगर्जने वृष्टिपतने न कोऽपि अश्रुणोत्। तदानीं कश्चन पुरुषः नौकया आगत्य तं शुनकं नीतवान्।

15. प्रकृतिसंरक्षणस्य उपायान् विचार्य लघुटिप्पणीं लिखत । (4)

श्रद्धेयाः अंशाः –

प्रकृतेः उपयोगः – नदीसंरक्षणम् – वायुसंरक्षणम् – पर्वतसंरक्षणम् – वनसंरक्षणम् – मलिनीकरणनिवारणम् ।

**अथवा**

**गद्दिकामधिकृत्य लघुटिप्पणीं लिखत।**

श्रद्धेयाः अंशाः –

गोत्रकला – अटियसमुदायः – नाटुगद्दिका – पूजागद्दिका – वाद्योपकरणानि – पि.के कालन् – गद्दिकोत्सवः ।

16. ‘विमानापघातः अभवत् – सर्वे सुरक्षिताः’ इति शीर्षकेण वार्तां रचयत । (4)

श्रद्धेयाः अंशाः –

स्थानम् - तिरुवनन्तपुरम्

समयः - बुधवासरः, प्रातः पञ्चवादनम्

कारणम्- यन्त्रदोषः

विशेषः - वैमानिकस्य उचिता प्रवृत्तिः।

**अथवा**

**भवद्भिः कृतामेकां यात्रामधिकृत्य दैनिकीं लिखत ।**

श्रद्धेयाः अंशाः –

दिनाङ्कः – स्थलम् – समयः – अनुभवः ।

17. कथास्तम्भं क्रमीकुरुत । (4)

- कस्यचित् मानवस्य वृक्षछेदनेन मयूरस्य नीडभङ्गः भवति ।
- वने एकः गर्विष्ठः मयूरः अस्ति।

© State Assessment Cell – SCERT Kerala

- जन्तवः वनसंरक्षणाय सन्नद्धा: भवन्ति।
- काकः वननशीकरणवार्ताम् अन्यान् विज्ञापयति।

**अथवा**

**क्रियापदानि उपयुज्य नूतनवाक्यानि रचयत।**

श्रावयति - ..........................................................।

राति - ..........................................................।

तोषयति - ..........................................................।

धारयति - ..........................................................।

© State Assessment Cell – SCERT Kerala

| | | | |
|---|---|---|---|
| | | उचितटिप्पणीलेखनम् | शीर्षकलेखनाय (1) आशयव्यक्ततायै (2)<br>भाषाशुद्ध्यै (1) |
| 16 | 4 | उचितवार्तालेखनम् | शीर्षकलेखनाय (1) आशयव्यक्ततायै (2)<br>भाषाशुद्ध्यै (1) |
| | | उचितदैनिकीलेखनम् | दैनिकीस्वरूपाय (1) आशयव्यक्ततायै (2)<br>भाषाशुद्ध्यै (1) |
| 17 | 4 | वने एकः गर्विष्ठः मयूरः अस्ति ।<br>कस्यचित् मानवस्य वृक्षछेदनेन मयूरस्य नीडभङ्गः भवति ।<br>काकः वननशीकरणवार्ताम् अन्यान् विज्ञापयति ।<br>जन्तवः वनसंरक्षणाय सन्नद्धाः भवन्ति । | आशयावगमनाय (2)<br>पूर्वापरयोजनाय (2) |
| | | पदानि उपयुज्य अर्थपूर्णानि वाक्यानि रचयति। | एकैकस्य वाक्यस्य लेखनाय ऐकैकः अङ्कः |

© State Assessment Cell – SCERT Kerala